कौशीलव्यं, चारणत्वं. गुणनिका, हस्तपादादिसञ्चालनं.

Dancing-master, *s.* नृत्याचार्य्यः, नृत्यशिक्षकः, नृत्यगुरुः *m.*

Dancing-school, *s.* नृत्यशिक्षणशाला, नृत्यशाला, नृत्यशिक्षावेश्म *n.* (न्).

Dandelion, *s.* सिंहपर्णी, सिंहदन्तसरूपपत्रः क्षुद्रौषधिभेदः.

Dandiprat or dapperling, *s.* बालकः, पुत्रकः, माणवकः, वामनः.

*To* dandle, *v. a.* ऊरुदेशे बालकं धृत्वा लल् in caus. (लालयति -यितुं).

Dandled, *p. p.* लालितः -ता -तं, सान्त्वकरणार्थं जानुदेशे धृतः -ता -तं.

Dandriff, dandruff, *s.* मज्जा, शिरोमध्ये पिण्डितस्नेहः, शिरोमलं.

Dandy, *s.* सुवेशी *m.* (न्), सुवसनः, दर्शनीयमानी *m.* (न्), छेकः.

Danger, *s.* भयं, भयहेतुः *m.*, संशयः, शङ्का, सन्देहः, विकल्पः, आतङ्कः, आपद् *f.*, विपद् *f.*, अपायः, विपत्तिः *f.*, उत्पातः, बाधा, व्याघातः; 'any thing exposed to danger,' भयस्थानं, संशयस्थानं, शङ्कास्पदं; 'danger of life,' जीवितसंशयः, प्राणनाशसंशयः, प्राणबाधः; 'we are in danger of being led to justice,' अस्माकं विचारस्थाने आनयनशङ्का विद्यते; 'in danger of punishment,' दण्डयोग्यः -ग्या -ग्यं; 'brought into danger,' संशयितः -ता -तं; 'an act attended with danger,' सन्दिग्धकर्म्म *n.* (न्).

*To* danger, *v. a.* संशयस्थं -स्थां -स्थं कृ, शङ्कास्पदं कृ, सन्देहस्थं -स्थां -स्थं कृ; 'one who dangers his life,' संशयितजीवितः.

Dangerous, *a.* भयङ्करः -रा -रं, भयानकः -की -कं, भयहेतुकः -का -कं, सन्दिग्धः -ग्धा -ग्धं, सांशयिकः -की -कं, संशयस्थः -स्था -स्थं, संशयापन्नः -न्ना -न्नं, शङ्काक्रान्तः -न्ता -न्तं, भयाक्रान्तः -न्ता -न्तं, भयजनकः -का -कं, भैरवः -वी -वं, विपज्जनकः -का -कं; 'a dangerous illness,' सन्निपातकः.

Dangerously, *adv.* यथा संशयः or भयहेतुर् उत्पद्यते तथा, भैरवं, शङ्कापूर्व्वकं, भयानकं, सन्दिग्धं; 'dangerously ill,' सन्निपातकरोगग्रस्तः.

Dangerousness, *s.* भयानकत्वं, सन्दिग्धता, सांशयिकत्वं, शङ्काक्रान्तत्वं.

*To* dangle, *v. n.* लुट् (c. 6. लुठति -ठितुं) चञ्च् (c. 1. चञ्चति -ञ्चितुं), लम्ब् (c. 1. लम्बते -म्बितुं), अवलम्ब्, लुल् (c. 1. लोलति -ते -लितुं).

Dangler, *s.* स्त्रीणाम् उपासने or स्त्रीभिः सह विलासकरणे कालक्षेपकः.

Dangling, *a.* चञ्चन् -ञ्चन्ती -ञ्चत् (त्), लोलः -ला -लं, लोलमानः -ना -नं, लुठन् -ठन्ती -ठत् (त्), लम्बमानः -ना -नं, अवलम्बितः -ता -तं, लुलितः -ता -तं.

Dapper, *a.* विनीतः -ता -तं, शुद्धाकारः -रा -रं, ललितरूपः -पा -पं.

*To* dapple, *v. a.* चित्र् (c. 10. चित्रयति -यितुं), चित्रविचित्रीकृ, कर्ब्बुरीकृ.

Dappled, *a.* चित्रितः -ता -तं, कर्ब्बुरितः -ता -तं, नानावर्णः -र्णा -र्णं.

*To* dare, *v. n.* धृष् (c. 5. धृष्णोति, धर्षितुं), साहसं कृ, साहसेन व्यवसो (c. 4. -स्यति -सातुं); 'I dare not ask him,' न तं प्रष्टुं धृष्णोमि.

*To* dare, *v. a.* (Challenge) आह्वे (c. 1. -ह्वयति -ह्वातुं), समाह्वे, नियुद्धार्थम् आह्वे, स्पर्ध् (c. 1. स्पर्धते -र्धितुं), आक्रन्द् (c. 1. -क्रन्दति -न्दितुं).

Dare, *s.* आह्वानं, समाह्वानं, योधसंरावः, क्रन्दितं, अभिग्रहः.

Dared, *p. p.* (Challenged) आहूतः -ता -तं, समाहूतः -ता -तं.

Daring, *s.* साहसं, प्रतिभा, धार्ष्ट्यं; 'act of daring,' अत्याहितं.

Daring, *a.* साहसी -सिनी -सि (न्), साहसिकः -की -कं, धृष्टः -ष्टा -ष्टं, धृष्णुः -ष्णुः -ष्णु, प्रगल्भः -ल्भा -ल्भं, धीरः -रा -रं, प्रवीरः -रा -रं, शूरः -रा -रं, निर्भयः -या -यं, अभीतः -ता -तं, निर्विशङ्कः -ङ्का -ङ्कं, अकुतोभयः -या -यं, विक्रान्तः -न्ता -न्तं, पराक्रमी -मिणी -मि (न्), प्रतिभानवान् -वती -वत् (त्), प्रतिभान्वितः -ता -तं.

Daringly, *adv.* साहसेन -सात्, साहसपूर्व्वकं, धृष्टं, धृष्टत्वात्, सशौर्य्यं, प्रगल्भं, निर्भयं, निर्विशङ्कं, सविक्रमं, सप्रतिभानं, वीरवत्.

Daringness, *s.* साहसं, साहसिकत्वं, धृष्टता, धृष्णुता, धार्ष्ट्यं, प्रगल्भता, प्रागल्भ्यं, प्रतिभा -भानं, निर्भयत्वं. वीरता, शौर्य्यं, धैर्य्यं, विक्रमः.

Dark, *a.* तामसः -सी -सं -सिकः -की -कं, तमस्वी -स्विनी -स्वि (न्), सान्धकारः -रा -रं, अन्धकारयुक्तः -क्ता -क्तं, सतिमिरः -रा -रं, तिमिरयुक्तः -क्ता -क्तं, तमोवृतः -ता -तं, तमोमयः -यी -यं, तमोभूतः -ता -तं, निरालोकः -का -कं, निष्प्रभः -भा -भं, अप्रकाशः -शा -शं, हतज्योतीः -तीः -तिः (स्).—(Obscure) गूढः -ढा -ढं, निगूढः -ढा -ढं, दुर्ज्ञेयः -या -यं, अस्पष्टः -ष्टा -ष्टं, दुर्दर्शः -र्शा -र्शं.—(Dark-coloured) कृष्णः -ष्णा -ष्णं, श्यामः -मा -मं, कालेयः -यी -यं, मेचकः -का -कं, नीलः -ला -लं, सितेतरः -रा -रं,—(Opaque) अस्वच्छः -च्छा -च्छं; 'a dark night,' तामसी, तमिस्रा, नष्टचन्द्रा रात्रिः.

Dark, *s.* तमः *n.* (स्), अन्धकारः, तिमिरं, तमिस्रं, अन्धं.

*To* darken, *v. a.* तिमिर (nom. तिमिरयति -यितुं), तिमिरीकृ, अन्धीकृ.

*To* darken, *v. n.* तमस्वी -स्विनी -स्वि भू, तिमिरीभू, अन्धीभू.

Darkened, *p. p.* तमोवृतः -ता -तं, तिमिरीकृतः -ता -तं, सन्तमसः -सा -सं.

Darkish, *a.* तमस्कल्पः -ल्पा -ल्पं, ईषत्तामसः -सी -सं.—(In colour) ईषत्कृष्णः -ष्णा -ष्णं, आकालः -ला -लं, आनीलः -ला -लं.

Darkling, *a.* तमोवर्त्ती -र्त्तिनी -र्त्ति (न्) or अन्धकारवर्त्ती.

Darkly, *adv.* अस्पष्टं, अप्रकाशं, अव्यक्तं, सान्धकारं, अन्धवत्, अन्धं.

Darkness, *s.* अन्धकारः, तमः *n.* (स्), तिमिरं, तमिस्रं, तमसं, ध्वान्तं, निरालोकता, सान्धकारत्वं, निष्प्रभता, अन्धं, शार्वरं, रात्रिवासः *n.* (स्), निशाचर्म्म *n.* (न्), भूच्छाया, खलुक् *m.* (ज्); 'slight darkness,' अवतमसं; 'great darkness,' अन्धतमसं, तमस्ततिः *f.*; 'universal darkness,' सन्तमसं,

Darksome, *s.* तमस्वी -स्विनी -स्वि (न्), तमस्कल्पः -ल्पा -ल्पं, निष्प्रभः -भा -भं,

Darling, *s.* प्रियः -या, हृदयप्रियः -या, दयितः -ता, स्नेहपात्रं.

Darling, *a.* हृदयप्रियः -या -यं, सुप्रियः -या -यं, प्रियतमः -मा -मं, हृद्यः -द्या -द्यं, वल्लभः -भा -भं, इष्टः -ष्टा -ष्टं, इष्टतमः -मा -मं.

Darn, *s.* वस्त्रयोन्यनुकृतं जीर्णवस्त्रसीवनं, वस्त्रसन्धिः *m.*

*To* darn, *v. a.* जीर्णवस्त्राणि सिव् (c. 4. सीव्यति, सेवितुं) or सूक्ष्मसूचिकर्म्मद्वारा सन्धा (c. 3. -धत्ते -धातुं).

Darnel, *s.* कक्षः, शस्यक्षेत्ररुहः कक्षप्रभेदः.

Dart, *s.* शूलः -लं, प्रासः, शल्यं, शङ्कुः *m.*, क्षिपणिः *m.*, पाणिमुक्तं, करमुक्तं, मुक्तकं, वाणः, अस्त्रं, समिकं, दूरवेधी *m.* (न्).

*To* dart, *v. a.* अस् (c. 4. अस्यति, असितुं), प्रास्, क्षिप् (c. 6. क्षिपति, क्षेप्तुं), मुच् (c. 6. मुञ्चति, मोक्तुं), प्रमुच्, सृज् (c. 6. सृजति, स्रष्टुं), ईर् (c. 10. ईरयति -यितुं), पत् in caus. (पातयति -यितुं), प्रहृ (c. 1. -हरति -हर्त्तुं).

*To* dart, *v. n.* (As lightning) स्फुर् (c. 6. स्फुरति -रितुं).—(Dart upon one) आपत् (c. 1. -पतति -तितुं), अभिद्रु (c. 1. -द्रवति -द्रोतुं).

*To* dash, *v. a.* (Throw or strike any thing suddenly or forcibly against another) सहसा or प्रसभं क्षिप् (c. 6. क्षिपति, क्षेप्तुं) or प्रक्षिप् or अस् (c. 4. अस्यति, असितुं) or प्रास् or पत् in caus (पातयति -यितुं), or अभिहन् (c. 2. -हन्ति -न्तुं), or अभ्याहन् or प्रतिहन् or प्रहृ (c. 1. -हरति -हर्त्तुं).—(Break by collision, dash in pieces) मृद् (c. 9. मृद्नाति, मर्द्दितुं), निष्पिष् (c. 7. -पिनष्टि -पेष्टुं), प्रभञ्ज् (c. 7. -भनक्ति, भंक्तुं), विघट्ट् (c. 10. -घट्टयति -यितुं), भूमौ प्रक्षिप्य खण्डं खण्डं कृ or खण्डशः कृ or लवशः कृ or चूर्ण् (c. 10. चूर्णयति -यितुं),—(Bespatter, besprinkle) अवकृ (c. 6. -किरति -करितुं -रीतुं), अभ्यवकृ, समवकृ; उक्ष् (c. 1. उक्षति -क्षितुं), अभ्युक्ष्, प्रोक्ष्; अवसिच् (c. 6. -सिञ्चति -सेक्तुं),—(Mingle, adulterate) मिश्र् (c. 10. मिश्रयति -यितुं), सम्मिश्र्, संसृज् (c. 6. -सृजति -स्रष्टुं).—(Confound) मुह् in caus. (मोहयति -यितुं), विनश् in caus. (-नाशयति -यितुं).—(Obliterate) व्यामृज् (c. 2. -मार्ष्टि -मार्ष्टुं), उच्छिद् (c. 7. -छिनत्ति -छेत्तुं), विलुप्